मुद्रित पृष्ठ : 2 अनुक्रमांक ......................

**आ/सेमे II/408**

# आचार्य ( द्वितीय सेमेस्टर ) परीक्षा, 2014-15

## व्याकरण

## VVY-423

***समयः - घंटात्रयम्*** ***पूर्णाङ्काः - 70***

***( प्रश्नपत्रप्राप्तिसमनन्तरमेव अस्योपरि स्वीयोऽनुक्रमाङ्कः लेख्यः )***

### भागः-क

**निर्देशः** केवल **द्वावेव** प्रश्नौ समाधेयौ । 2 × 20 = 40

**1.** निपातानां वाचकत्वाभावे तेषां कीदृशमर्थवत्त्वं नागेशेन स्वीकृतमिति प्रतिपाद्य एवकारार्थविषयकं नागेशमतं प्रतिपादयन्तु ।

**2.** नागेशाभिमतं तादृशं कर्मत्वं विवेचयन्तु येन 'न काशीं गच्छति न प्रयाग' मित्यादौ फलाश्रयत्वाभावेऽपि कर्मत्वं स्यात् ।

**3.** 'पञ्चकं प्रातिपदिकार्थः' इति शाब्दिकमतं सयुक्तिकं विवेचयन्तु ।





**4.** मञ्जूषाकाराभिमतं सामर्थ्यं सप्रमाणं सोदाहरणं च प्रतिपादयन्तु ।

### भागः-ख

**निर्देश** : केवलं **द्वावेव** प्रश्नौ समाधेयौ । 2 × 15 = 30

**5.** 'धातुः पूर्वं साधनेन युज्यते पश्चादुपसर्गेण । इति भाष्यस्य तात्पर्यं सप्रमाणं वर्णयन्तु ।

**6.** वर्तमानत्वं भूतत्वं भविष्यत्त्वं च विवेच्य 'चक्रे सुबन्धुः' इत्यत्र लिटि उत्तमपुरुषस्य प्रयोगस्य साधुत्वं प्रदर्शयन्तु ।

**7.** नागेशप्रतिपादितं सम्प्रदानत्वं विवेच्य अधिकरणत्वं स्पष्टीकुर्वन्तु नारगेशानुसारम् ।

**8.** सम्बन्धस्योभयनिष्ठत्वेऽपि विशेषणवाचकादेव कथं षष्ठीति सप्रमाणं निरूपयन्तु ।